# ऋग्वेदे स्थापत्यकलायाः वास्तुशास्त्रस्य चोत्कर्षः

**अरविन्दशर्मा***

*jeevanjyotijyotisha@gmail.com*

**शोधसार**

*सुखसुविधादीनामेच्छुकः मानवः अतीव प्राचीनकालादेव स्वनिवासव्यवस्थां प्रति जागृतः दृश्यते। एतस्य प्रमाणमस्माभिः ऋग्वेदस्य दशममण्डलेषु निहितानेकसूक्तेषु अस्माकं पूर्वजाणां अनेकानेकवैभवसम्पन्नभवननिर्माणसम्बद्धसन्दर्भेषु दृष्टिपातेन प्राप्यते। वास्तुशास्त्रमिदं भवननिर्माणसम्बद्धातीवप्राचीनविद्या वर्तते, इयं विद्या वैदिककालादेव प्राचाल्यमाणार्याणाम् आवासव्यवस्थायाः उत्कृष्टस्तरेणास्माकं परिचयं कारयति। जानन्त्येव सर्वे यत् ऋग्वेदः विश्वस्य प्राचीनतम ग्रन्थः वर्तते, अतएव तस्मिन् कालेऽपि वयं वास्तुविषयकविज्ञाने सिद्धहस्ताः पारङ्गताश्चास्म।*

वास्तुशब्दस्य पर्यायरूपेण स्थापत्यशब्दस्य प्रयोगोऽपि भवति, स्थापत्यशब्दोऽयं स्थपतिशब्दादुद्भूतः, यः स्था धातोः 'पति' प्रत्ययस्य सन्धिद्वारा निर्मीयते। स्थाधातोः स्थित्यर्थः वर्तते। अस्मादेव स्थिर-स्थावर-स्थिति-स्थानादिशब्दानामुत्पत्तिः सञ्जाता। भवनमपि स्थिरावस्थायां स्थितः स्थानविशेषः, इत्यस्मात् भवनस्य निर्माणकर्ता, निर्माणप्रक्रियायाः, सम्पूर्णज्ञाता वा स्थपतिः नाम्ना अभिहितः, स्थपतिद्वारा निर्मितरचना स्थापत्य इत्युदाहृतः।[1] स्थापत्यपदोऽयं यद्यपि ऋग्वेदे नोपलभ्यते किन्तु स्थापत्यभावबोधकाः स्थापयन्ति,[2] स्थापयसे,[3] प्रतिष्ठादयः[4] शब्दा उपलभ्यन्ते।

"स्थपतेः कर्मस्थापत्यम्"[5] इति व्युत्पत्त्यनुसारं स्थापना शब्दस्य व्याप्तिस्तु गृहनिर्माणं यावदेव भवति। किन्तु वास्तुपदेनn तु गृहादेवप्रासाद-राजप्रासाद-वापी-कूप-तडाग-उद्यान-भूलक्षण-

---

*** शोधच्छात्रः,ज्योतिषविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्(मानित विश्वविद्यालयः), नवदेहली-16।**

1 भारतीय स्थापत्य एवं कला, पृ. 8, डा. उदयनारायण उपाध्याय एवं तिवारी

2 आरे मघा को न्विश्त्था ददर्श यं युञ्जन्ति तम्वा स्थापयन्ति । , ऋग्वेदः , १०/१०२/१०

3 नि तद्दधिषेऽवरं परं च यस्मिन्नाविथावसा दुरोणे ।
आ मातरा स्थापयसे जिगत्नू अत इनोषि कवरा पुरूणि , ऋग्वेदः , १०/१२०/०७

4 सनामाना चिद्ध्वसयो न्यस्मा अवाहन्निन्द्र उषसो यथानः ।
ऋष्वैरगच्छः सखिभिर्निकामैः साकं प्रतिष्ठा हृद्या जघन्थ , ऋग्वेदः , १०/७३/०६

5 एनसाइक्लोपीडिया ऑफ हिन्दु आर्किटेक्चर, डॉ. प्रसन्न कुमार

दिक्साधनगृहारम्भ-वास्तुपुरुषस्थिति-दिक्परत्वेनगृहविभाग-जीर्णोद्धारविधि-शिलान्यासविधि-वास्तुशान्तिपद्धति-प्रतिष्ठाविचारादयः विषयाः ज्योतिषसम्बद्धविषयाश्चान्तर्भूताः भवन्ति।[1]

वास्तुशास्त्रस्य शाब्दिकार्थः 'स्थापत्यस्य विज्ञानम्' (science of architecture) अस्ति, किन्तु वास्तुशास्त्रमिदं वैज्ञानिकतया साकमाध्यात्मिकतत्त्वसम्पन्नो वर्तते, शास्त्रस्य कार्यकारणता-अनुकरणीयता- स्थिरता-सूत्रबद्धता-प्रयोजकता-सार्वभौमिकतादयः लक्षणाः वास्तुशास्त्रे सर्वत्र दृश्यन्ते। कश्चिदपि मानवीयानुभवः कार्यकारणसम्बन्धादि षडलक्षणैः युक्तो भूत्वैव शास्त्रत्वं प्राप्नोति, वास्तुशास्त्रे इमानि लक्षणानि प्रचुरमात्रायां प्राप्यन्ते तस्मादेयं विद्या वास्तुशास्त्रनाम्नाभिधीयते।[2] अतएव वास्तुशास्त्रमात्मनि अत्यधिकविषयसङ्कलनेन स्थापत्यकलातः अधिकव्यापको वर्तते। वस्तुतः वैदिकसभ्यतायाः संस्कृतेश्च केन्द्रबिन्दुः यज्ञ-वेदिः वर्तते। ऋग्वैदिककालादेव भारतीयपरिवेशे यज्ञपरम्परा अद्यावधिः प्राचाल्यमाणा वर्तते। अस्माकं ऋषिभिः यज्ञविज्ञानेनैव अनेकानेकविधानां प्राप्तिः, गुप्तरहस्याणां ज्ञानञ्च प्राप्तम्। अस्मिन्नेव क्रमे वास्तुविद्यायाः ऐतिहासिकयात्राऽपि समारब्धा। यज्ञस्य पवित्रवातावरणे वास्तुविद्यायाः शुभारम्भः जातः। ऋग्वेदानुसारं ऋषिसभायां कश्चित् ऋषिः अन्येभ्यः प्रश्नमकरोत् यत् पृथिव्याः केन्द्रस्थानं किम्? उपांतश्च कुत्र वर्तते?[3]

विद्वत्सु चर्चा नूतनतथ्यान्वेषणाय सहायको भवति अतएवोत्तरं प्राप्तं यत् इयं यज्ञवेदिः पृथिव्या नाभिः उपातंश्च वर्तते।[4]

ऋषिसंवादेन अस्माभिः ज्ञायते यत् पृथिव्याः गोलकाकृतिः, गोलकवस्तोः केन्द्रस्थानमुपांतश्च सर्वत्र भवति। ऋषिभिः अनेन तथ्यान्वेषणेन अक्षेत्रवितस्य (ज्यामिति) शास्त्रीयसिद्धान्तस्य प्रतिपादनं कृतम्। यज्ञवेदयः सम्भवतः अनन्तरकाले मन्दिरनिर्माणस्य अग्रदूतरूपेण प्रकटिताः। यज्ञवेदयः वृत्ताकारः, वर्गाकारः, त्रिभुजाकारः, श्येनाकारः चासन्।[5] शुल्बसूत्रमक्षेत्रवितस्य मूलग्रन्थोऽस्ति, यस्मिन् वेदि-वास्तोः सिद्धान्ताः प्रदत्ताः, एते सिद्धान्ताः एव आगामिकाले वास्तुशास्त्रस्याधारभूतसिद्धान्ताः जाताः। एवमेव यज्ञस्थले प्रस्थापित-काष्ठनिर्मितयूपः आवासीयस्थापत्यस्य मूलाधारः जातः।

---

1 बृहद्वास्तुमाला, विषयसूची, पं. श्रीरामनिहोरद्विवेदी

2 भारतीय वास्तुशास्त्र, प्रो. शुकदेव चतुर्वेदी, पृ. 7

3 को अस्य वेद भुवनस्य नाभिः
पृच्छामि त्वा परमन्तं पृथिव्या
पृच्छामि यत्र भुवनस्य नाभिः।।, ऋग्वेदः , ०१/१६४/३४

4 इयं वेदिः परो अन्तः पृथिव्या
अयं यज्ञो भुवनस्य नाभिः।।, ऋग्वेदः , ०१/१६४/३५

5 भारतीय स्थापत्य एवं कला, पृ. ११

यज्ञवेदिः मंदिरस्य गर्भगृहरूपेण यज्ञ-शालारूपेण वा, यज्ञमंडपः देवमन्दिररूपेण विकसितः इति मंदिरवास्तुसंरचनया ज्ञायते।[1] एवमुपरोक्तोदाहरणैः ऋग्वैदिककालीनयज्ञवेदिः वास्तुशास्त्रस्य विकास्याधारः इति विद्वद्भिः विचार्यते।

ऋग्वेदे एतादृशस्योपरोक्तवास्तुशास्त्रस्य स्थापत्यकलायाः वा महान् उत्कर्षः दृश्यते। यथा अनेकमण्डलेषु सूक्तेषु च आर्याणामावासचर्चायां गृहनिमित्तं गृह-गय-धामन्-दम-दुरोण-दुर्य-स्थान-सदस्-सदम-सदन-नृषदन-मान-विमान-द्रय-अयन-शर्म-आयतन-क्षय-श्रय-हर्म्य-ओकस्-वास्तु-वसति-शरण-प्रसदमन्-निवेशन-वेश्म-वेश-साला-शाला-नीड-पस्त्या-अस्तादयः शब्दाः प्रयुक्ताः सन्ति।[2] एतेषु केषाञ्चित् शब्दानामर्थः विशेषगृहप्रकारः अथवा गृहस्य कस्यचित् सीमितसुनिश्चितभागयोः कृते आसीत्। एतेषु शब्देषु वास्तोः अपारवैभवं संलक्ष्यते।

डॉ.पृथ्वीकुमारअग्रवालमहोदयानुसारं जीवनस्य भौतिकसमृद्धेः द्योतकानेकविधशिल्पनिर्माण-कलात्मकाभिप्रायाणां परिचयः वैदिकसंहिताभिः भूयते। ऋग्वेदे असुराणां सुदृढपुरस्य वर्णनमनेकवारं प्राप्यते। तेन अधिकांशविद्वांसाः दुर्गसदृशनगरनिर्माणस्य द्योतकं मन्वते। एतेषां पुराणां विध्वंसः इन्द्रेण कृतः तस्मात् इन्द्रः पुरन्दर-पुरभिद्-पूर्भिदादिभिः नामभिः ऋग्वेदे अभिहितः।[3] वस्तुतः पुरस्य मूलभूतार्थः नगरमेवासीत्। एतेनेवानन्तरं प्रेरणां प्राप्य उत्तरवैदिककालीननगराणां विकासः जातः। ऋग्वैदिककाले धनिकाः उन्नतप्रासादेषु निवसन्ति स्म, येषु अनेकद्वाराणि, दीर्घकायस्तम्भाश्चासन्। सामान्यवर्गः गृहेषु निवसति स्म, एतेषु गृहेषु अनेके प्रकोष्ठाः आसन्, गृहेषु पशुपालनार्थं भिन्नव्यवस्था आसीत्। पशुशालायाः कृते गोष्ठः इति शब्दः तत्र प्रयुक्तः।[4]

ऋग्वेदस्य सप्तममण्डले अग्निदेवं प्रार्थ्यते यत् सः अपरिमितवैभवसम्पन्नधातुयुक्तपूर्भिः अस्मान् पाहि।[5] अन्यत्र अग्निदेवं प्रार्थ्यते यत् सः मनुष्याणां रक्षणार्थं शतस्तम्भयुक्ताजेयपुराणां निर्माणं कुर्यात्। चतुर्थमण्डले पाषाणनिर्मितपुराणामुल्लेखोऽस्ति।[6] इत्युक्ते आर्याः गृहनिर्माणेषु पाषाणधात्वादीनां न्यूनाधिकप्रयोगेण सुपरिचिताः आसन्। तस्मिन् काले बृहदाकारभवनानि आसन्, ऋग्वेदस्य

---

1 वैदिककालीन रूपंकर कलाएँ, अ. २, पृ. ७५

2 वैदिककालीन रूपंकर कलाएँ, अ. २ , पृ. ४७

3 प्राचीन भारतीय कला एवं वास्तु, अ. २ , पृ. ४६

4 ऋग्वेदकलीन भारत, श्रीकन्छेदीलालगुप्ता, पृ. ६६

5 तेभिर्नो अग्ने अमितैर्महोभिः शतं पूर्भिरायसीभिर्नि पाहि।, ऋग्वेदः, ०७/०३/०७

6 शतमश्मन्मयीनां पुरामिन्द्रो व्यास्यत् । दिवोदासाय दाशुषे, ऋग्वेदः,०४/३०/२०

ऋषिवशिष्ठः द्यौलोकस्थितवैदिकदेवानां राज्ञः वरुणदेवस्य सदनं प्रविश्य तस्य सहस्रद्वारयुक्तविशालतां वर्णयति।[1]

द्वितीयमण्डले गृहस्य छदेः स्तंभनार्थं स्तम्भस्य महत्त्वमवलोक्यैव आर्यैः द्युलोकस्य धारकत्वेन इन्द्राय 'महान् स्कंभियान्' इत्युक्तम्, येन भुवि महानस्तम्भमारोप्य आकाशः स्तम्भितः।[2] स्तम्भस्येदमाधारमेव स्वीकृत्य आगामिकाले सहस्रसंख्यापरिमितस्तम्भयुक्तविशालावासानां रचना अभूत्।

ऋग्वैदिककाले वास्तुकलायाः विविधरूपाणां यथा मूर्तिकला-दुर्ग-गृह-पुर-ग्रामनिर्माणादीनाम् उल्लेखः प्राप्यते। तस्मिन् काले विशालकायदुर्गाणां निर्माणं क्रियते स्म। लौहनिर्मितदुर्गाणां नगराणां च वर्णनं प्राप्यते। सप्तममण्डलस्य पञ्चमसूक्ते काष्ठनिर्मितपुराः दासानामाक्रमणेन प्रज्वलिताः। राजा स्वपरिवारेण सेवकैश्च साकं विशालपुरे निवसति स्म, तत्र वणिजाः अपि आसन्।[3] ऋग्वेदे वास्तोष्पतिः, गृहदेवताऽस्ति, यस्यावाहनं मनुष्येभ्यः पशुभ्यश्च शुभाशीषं प्रदातुं, रोगप्राशमनार्थं, अश्व-पशवादीनां समृद्धिनिमित्तम्, आवाहनकर्तुं संरक्षणार्थञ्च क्रियते स्म। एवमेव ऋक्संहितायां वास्तोष्पतेः अनेकस्तुतिपरकमन्त्राः आगताः।[4]

एवमुपरोक्तप्रमाणैः ज्ञायते यत् ऋग्वेदे स्थापत्यकलायाः वास्तुशास्त्रस्य चोत्कर्षः महान् आसीत्। आर्यैः वास्तुविद्यायामुच्चस्तरीयविकासः आप्नोत्। तैः आध्यात्मिकपरिवेशे वैज्ञानिकतत्त्वाधारेण वास्तुशास्त्रस्य उत्कृष्टसिद्धान्तानां रचना कृता।

1 बृहन्तं मानं वरुण स्वधावः।
सहस्रद्वारं जगमा गृहन्ते।।, ऋग्वेदः, ०७/८८/०५

2 स प्राचीनान् पर्वतान् दृंहदोजसा ऽधरांचीनमकृणोदपामपः ।
अधारयत् पृथिवीं विश्वधायसमस्तभ्नान्मायया द्यामवस्रमः, ऋग्वेदः ,०२/१७/०५

3 ऋग्वेदकालीन भारत, पृ. ६५ -६६

4 ओउम् वास्तोष्पते प्रतिजानीह्य स्मान्त्स्वावेशोऽनमीवो भवानः। यत्वे महे प्रति तन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे।।
ओउम् वास्तोष्पते प्रतरणो नऽएधिगयसफानो गोभिरश्वेमिरिन्दो। अजरासस्ते सख्ये स्थामपितेव पुत्रान्प्रतिनो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे।।
ओउम् वास्तोष्पते शगमयासं सदाते सक्षीमहिरण्ययागातुमत्या। पाहि क्षेमऽउतयोगेश्वरन्नो यूयं पातस्वस्तिभिः सदा नः।
ओउम् अमीवहा वास्तोष्पते विश्वारूपाण्याविशन्। सखासु शेव एधिनः।।

**भारतीय वास्तुशास्त्र, प्रो. शुकदेव चतुर्वेदी, अ. १, पृ. १**

## सन्दर्भग्रन्थाः -


- उपाध्याय डा. उदयनारायण , तिवारी प्रो.गौतम , (लेखक द्वय ) २००७, भारतीय स्थापत्य एवं कला, मोतीलाल बनारसीदास, दिल्ली -०७
- ऋग्वेद संहिता, (मूलमात्र) २००६ , चौखम्बा संस्कृत प्रतिष्ठान,३८ यू.ए. बंगलो रोड, जवाहर नगर, दिल्ली -०७
- कुमार डॉ. प्रसन्न , १९४७ ,एनसाइक्लोपीडिया ऑफ हिन्दु आर्किटेक्चर, आक्सफोर्ड यूनिवर्सिटी प्रेस , लन्दन
- द्विवेदी स्व.पं. श्रीरामनिहोर , (संग्रहकर्ता) त्रिपाठी डा. ब्रह्मानन्द (सम्पादक), २००३ बृहद्वास्तुमाला, चौखम्बा सुरभारती प्रकाशन , वाराणसी -२२१००१
- चतुर्वेदी प्रो. शुकदेव (लेखक ), २००४, भारतीय वास्तुशास्त्र, श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ, कटवारिया सराय, नई दिल्ली -१६
- चंद्रिकेश डा.जगदीश (लेखक ),२०१० वैदिककालीन रूपंकर कलाएँ, अनन्य प्रकाशन दिल्ली -३५
- गुप्ता श्रीकन्छेदीलाल, (लेखक ), प्रथम संस्करण २००५, ऋग्वेदकलीन भारत, चौखम्बा कृष्णदास अकादमी, वाराणसी|


***********